# Bhishmaproktam Mahapurusharupavarnanam

# भीष्मप्रोक्तं महापुरुषरूपवर्णनम्

## Document Information

Text title : Bhishmaproktam Mahapurusharupavarnanam

File name : bhIShmaproktaMmahApuruSharUpavarNanam.itx

Category : vishhnu, vishnu, mahAbhArata

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | shAntiparva | adhyAya 326/2-9||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# भीष्मप्रोक्तं महापुरुषरूपवर्णनम्

किञ्चिच्चन्द्रविशुद्धात्मा किञ्चिच्चन्द्राद्विशेषवान् ।
कृशानुवर्णः किञ्चिच्च किञ्चिद्धिष्ण्याकृतिः प्रभुः ॥ २॥

शुकपत्रवर्णः किञ्चिच्च किञ्चित्स्फटिकसप्रभः ।
नीलाञ्जनचयप्रख्यो जातरूपप्रभः क्वचित् ॥ ३॥

प्रवालाङ्कुरवर्णश्च श्वेतवर्णः क्वचिद्बभौ ।
क्वचित्सुवर्णवर्णाभो वैडूर्यसदृशः क्वचित् ॥ ४॥

नीलवैडूर्यसदृश इन्द्रनीलनिभः क्वचित् ।
मयूरग्रीववर्णाभो मुक्ताहारनिभः क्वचित् ॥ ५॥

एतान्वर्णान्बहुविधान् रूपे बिभ्रत्सनातनः ।
सहस्रनयनः श्रीमाञ्शतशीर्षः सहस्रपात् ॥ ६॥

सहस्रोदरबाहुश्च अव्यक्त इति च क्वचित् ।
ओङ्कारमुद्गिरन्वक्त्रात्सावित्रीं च तदन्वयाम् ॥ ७॥

शेषेभ्यश्चैव वक्त्रेभ्यश्चतुर्वेदोद्गतं वसु ।
आरण्यकं जगौ देवो हरिर्नारायणो वशी ॥ ८॥

वेदीं कमण्डलुं दर्भान्मणिरूपानथोपलान् ।
अजिनं दण्डकाष्ठं च ज्वलितं च हुताशनम् ।
धारयामास देवेशो हस्तैर्यज्ञपतिस्तदा ॥ ९॥

इति महाभारते शान्तिपर्वणि ३२६ अध्यायान्तर्गतं
भीष्मप्रोक्तं नारदाय दर्शितं महापुरुषरूपवर्णनं सम्पूर्णम् ।

महाभारत । शान्तिपर्व । अध्याय ३२६/२-९॥

mahAbhArata . shAntiparva . adhyAya 326/2-9..

Proofread by PSA Easwaran

*Bhishmaproktam Mahapurusharupavarnanam*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*